The Pada Paath - transliteration

dadhi-krāvṇaḥ | akāriṣam | jiṣṇoḥ | aśvasya | vājinaḥ | surabhi | naḥ | mukhā | karat | pra | ṇaḥ | āyūṃṣi | tāriṣat

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-040/mantra-rig-04-040-001

MANTRA NUMBER:

Mantra 1 of Sukta 40 of Mandal 4 of Rig Veda
Mantra 1 of Varga 14 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 65 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- दधिक्रावा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

द॒धि॒क्राव्ण॒ इदु॒ नु च॑र्किराम॒ विश्वा॒ इन्मामु॒षस॑: सूदयन्तु । अ॒पाम॒ग्नेरु॒षस॒: सूर्य॑स्य॒ बृह॒स्पते॑राङ्गिर॒सस्य॑ जि॒ष्णोः ॥

The Mantra without meters (Sanskrit)

दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः सूदयन्तु । अपामग्नेरुषसः सूर्यस्य बृहस्पतेराङ्गिरसस्य जिष्णोः ॥

The Mantra's transliteration in English

dadhikrāvṇa id u nu carkirāma viśvā in mām uṣasaḥ sūdayantu | apām agner uṣasaḥ sūryasya bṛhaspater āṅgirasasya jiṣṇoḥ ||

The Pada Paath (Sanskrit)

द॒धि॒ऽक्राव्ण॑: । इत् । ऊँ इति॑ । नु । चा॒र्कि॒रा॒म॒ । विश्वा॑ । इत् । माम् । उ॒षस॑: । सू॒द॒य॒न्तु॒ । अ॒पाम् । अ॒ग्नेः । उ॒षस॑: । सूर्य॑स्य । बृह॒स्पते॑: । आ॒ङ्गि॒र॒सस्य॑ । जि॒ष्णोः ॥

The Pada Paath - transliteration

dadhi-krāvṇaḥ | it | oṃ iti | nu | cārkirāma | viśvā | it | mām | uṣasaḥ | sūdayantu | apām | agneḥ | uṣasaḥ | sūryasya | bṛhaspateḥ | āṅgirasasya | jiṣṇoḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-040/mantra-rig-04-040-002

MANTRA NUMBER:
Mantra 2 of Sukta 40 of Mandal 4 of Rig Veda
Mantra 2 of Varga 14 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 66 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- दधिक्रावा

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुरण्यसत् । सत्यो द्रवो द्रवरः पतंगरो दधिक्रावेषमूर्जं स्वर्जनत् ॥

The Mantra without meters (Sanskrit)

सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुरण्यसत् । सत्यो द्रवो द्रवरः पतंगरो दधिक्रावेषमूर्जं स्वर्जनत् ॥

The Mantra's transliteration in English

satvā bhariṣo gaviṣo duvanyasac chravasyād iṣa uṣasas turaṇyasat | satyo dravo dravaraḥ pataṁgaro dadhikrāveṣam ūrjaṁ svar janat ||

The Pada Paath (Sanskrit)

सत्वा । भरिषः । गोऽइषः । दुवन्यऽसत् । श्रवस्यात् । इषः । उषसः । तुरण्यऽसत् । सत्यः । द्रवः । द्रवरः । पतङ्गरः । दधिऽक्रावा । इषम् । ऊर्जम् । स्वः । जनत् ॥

The Pada Paath - transliteration

satvā | bhariṣaḥ | go--iṣaḥ | duvanya-sat | śravasyāt | iṣaḥ | uṣasaḥ | turaṇya-sat | satyaḥ | dravaḥ | dravaraḥ | pataṅgaraḥ | dadhi-krāvā | iṣam | ūjarm | svaḥ | janat

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-040/mantra-rig-04-040-003

MANTRA NUMBER:

Mantra 3 of Sukta 40 of Mandal 4 of Rig Veda
Mantra 3 of Varga 14 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 67 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- दधिक्रावा

छन्द: (Chhand) :- स्वराट्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उ॒त स्मा॑स्य॒ द्रव॑तस्तुर॒ण्य॒तः प॒र्णं न वेर॑नु वाति प्रग॒र्धिनः॑। श्ये॒नस्ये॑व॒ ध्रज॑तो अ॒ङ्कसं॒ परि॑ दधि॒क्राव्णः॑ स॒होर्जा तरि॑त्रतः॥

The Mantra without meters (Sanskrit)

उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः। श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः॥

The Mantra's transliteration in English

uta smāsya dravatas turaṇyataḥ parṇaṁ na ver anu vāti pragardhinaḥ | śyenasyeva dhrajato aṅkasam pari dadhikrāvṇaḥ sahorjā taritrataḥ ||

The Pada Paath (Sanskrit)

उ॒त। स्म॒। अ॒स्य॒। द्रव॑तः। तु॒र॒ण्य॒तः। प॒र्णम्। न। वेः। अनु॑। वा॒ति॒। प्र॒ऽग॒र्धिनः॑। श्ये॒नस्य॑ऽइव। ध्रज॑तः। अ॒ङ्क॒सम्। परि॑। द॒धि॒ऽक्राव्णः॑। स॒ह। ऊ॒र्जा। तरि॑त्रतः॥

The Pada Paath - transliteration

uta | sma | asya | dravataḥ | turaṇyataḥ | parṇam | na | veḥ | anu | vāti | pra-gardhinaḥ | śyenasya-iva | dhrajataḥ | aṅkasam | pari | dadhi-krāvṇaḥ | saha | ūrjā | taritrataḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-040/mantra-rig-04-040-004

MANTRA NUMBER:

Mantra 4 of Sukta 40 of Mandal 4 of Rig Veda
Mantra 4 of Varga 14 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 68 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- दधिक्रावा

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि । क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्कांस्यन्वापनीफणत् ॥

The Mantra without meters (Sanskrit)

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि । क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्कांस्यन्वापनीफणत् ॥

The Mantra's transliteration in English

uta sya vājī kṣipaṇiṁ turaṇyati grīvāyām baddho apikakṣa āsani | kratuṁ dadhikrā anu saṁtavītvat pathām aṅkāṁsy anv āpanīphaṇat ||

The Pada Paath (Sanskrit)

उत । स्यः । वाजी । क्षिपणिम् । तुरण्यति । ग्रीवायाम् । बद्धः । अपिऽकक्षे । आसनि । क्रतुम् । दधिऽक्राः । अनु । सम्ऽतवीत्वत् । पथाम् । अङ्कांसि । अनु । आऽपनीफणत् ॥

The Pada Paath - transliteration

uta | syaḥ | vājī | kṣipaṇim | turaṇyati | grīvāyām | baddhaḥ | āpi-kakṣe | āsani | kratum | dadhi-krāḥ | anu | sam-tavītvat | pathām | aṅkāṃsi | anu | āpanīphaṇat

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-040/mantra-rig-04-040-005

MANTRA NUMBER:

Mantra 5 of Sukta 40 of Mandal 4 of Rig Veda
Mantra 5 of Varga 14 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 69 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

हं॒सः शु॑चि॒षद्वसु॑रन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत् । नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जा ऋ॑त॒जा अ॑द्रि॒जा ऋ॒तम् ॥

The Mantra without meters (Sanskrit)

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥

The Mantra's transliteration in English

haṁsaḥ śuciṣad vasur antarikṣasad dhotā vediṣad atithir duroṇasat | nṛṣad varasad ṛtasad vyomasad abjā gojā ṛtajā adrijā ṛtam ||

The Pada Paath (Sanskrit)

हं॒सः । शु॒चि॒ऽसत् । वसुः॑ । अ॒न्त॒रि॒क्ष॒ऽसत् । होता॑ । वे॒दि॒ऽसत् । अति॑थिः । दु॒रो॒ण॒ऽसत् । नृ॒ऽसत् । व॒र॒ऽसत् । ऋ॒त॒ऽसत् । व्यो॒म॒ऽसत् । अ॒प्ऽजाः । गो॒ऽजाः । ऋ॒त॒ऽजाः । अ॒द्रि॒ऽजाः । ऋ॒तम् ॥

The Pada Paath - transliteration

haṃsaḥ | śuci-sat | vasuḥ | antarikṣa-sat | hotā | vedi-sat | atithiḥ | duroṇa-sat | nṛ-sat | vara-sat | ṛta-sat | vyoma-sat | abjāḥ | go--jāḥ | ṛta-jāḥ | ādri-jāḥ | ṛtam

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-001

MANTRA NUMBER:

Mantra 1 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 1 of Varga 15 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 70 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रा॒ को वां॑ वरुणा सु॒म्नमा॑प॒ स्तोमो॑ ह॒विष्माँ॑ अ॒मृतो॒ न होता॑ । यो वां॑ हृ॒दि क्रतु॑माँ अ॒स्मदु॒क्तः प॒स्पर्श॑दिन्द्रावरुणा॒ नम॑स्वान् ॥

The Mantra without meters (Sanskrit)

इन्द्रा को वां वरुणा सुम्नमाप स्तोमो हविष्माँ अमृतो न होता । यो वां हृदि क्रतुमाँ अस्मदुक्तः पस्पर्शदिन्द्रावरुणा नमस्वान् ॥

The Mantra's transliteration in English

indrā ko vāṁ varuṇā sumnam āpa stomo haviṣmām̐ amṛto na hotā | yo vāṁ hṛdi kratumām̐ asmad uktaḥ pasparśad indrāvaruṇā namasvān ||

The Pada Paath (Sanskrit)

इन्द्रा॑ । कः । वा॒म् । व॒रु॒णा॒ । सु॒म्नम् । आ॒प॒ । स्तोमः॑ । ह॒विष्मा॑न् । अ॒मृतः॑ । न । होता॑ । यः । वा॒म् । हृ॒दि । क्रतु॑ऽमान् । अ॒स्मत् । उ॒क्तः । प॒स्पर्श॑त् । इ॒न्द्रा॒व॒रु॒णा॒ । नम॑स्वान् ॥

The Pada Paath - transliteration

indrā | kaḥ | vām | varuṇā | sumnam | āpa | stomaḥ | haviṣmān | amṛtaḥ | na | hotā | yaḥ | vām | hṛdi | kratu-mān | asmat | uktaḥ | pasparśat | indrāvaruṇā | namasvān

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-002

MANTRA NUMBER:

Mantra 2 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 2 of Varga 15 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 71 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रा॒ ह॒ यो वरु॑णा च॒क्र आ॒पी दे॒वौ मर्तः॑ स॒ख्याय॒ प्रय॑स्वान् । स ह॑न्ति वृ॒त्रा स॑मि॒थेषु॒ शत्रू॒नवो॑भिर्वा म॒हद्भि॒: स प्र शृ॑ण्वे ॥

The Mantra without meters (Sanskrit)

इन्द्रा ह यो वरुणा चक्र आपी देवौ मर्तः सख्याय प्रयस्वान् । स हन्ति वृत्रा समिथेषु शत्रूनवोभिर्वा महद्भिः स प्र शृण्वे ॥

The Mantra's transliteration in English

indrā ha yo varuṇā cakra āpī devau martaḥ sakhyāya prayasvān | sa hanti vṛtrā samitheṣu śatrūn avobhir vā mahadbhiḥ sa pra śṛṇve ||

The Pada Paath (Sanskrit)

इन्द्रा॑ । ह॒ । यः । वरु॑णा । च॒क्रे । आ॒पी इति॑ । दे॒वौ । मर्तः॑ । स॒ख्याय॑ । प्रय॑स्वान् । सः । ह॒न्ति॒ । वृ॒त्रा । स॒म्ऽइ॒थेषु॑ । शत्रू॑न् । अवः॑ऽभिः । वा॒ । म॒हत्ऽभिः॑ । सः । प्र । शृ॒ण्वे॒ ॥

The Pada Paath - transliteration

indrā | ha | yaḥ | varuṇā | cakre | āpī iti | devau | martaḥ | sakhyāya | prayasvān | saḥ | hanti | vṛtrā | sam-itheṣu | śatrūn | avaḥ-bhiḥ | vā | mahat-bhiḥ | saḥ | pra | śṛṇve

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-003

MANTRA NUMBER:

Mantra 3 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 3 of Varga 15 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 72 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रा॑ ह॒ रत्नं॒ वरु॑णा॒ धेष्ठे॒त्था नृभ्यः॑ शशमा॒नेभ्य॒स्ता । यदी॒ सखा॑या स॒ख्याय॒ सोमैः॑ सु॒तेभिः॑ सु॒प्र॒यसा॑ मा॒दयै॑ते ॥

The Mantra without meters (Sanskrit)

इन्द्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शशमानेभ्यस्ता । यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते ॥

The Mantra's transliteration in English

indrā ha ratnaṁ varuṇā dheṣṭhetthā nṛbhyaḥ śaśamānebhyas tā | yadī sakhāyā sakhyāya somaiḥ sutebhiḥ suprayasā mādayaite ||

The Pada Paath (Sanskrit)

इन्द्रा॑ । ह॒ । रत्न॑म् । वरु॑णा । धेष्ठा॑ । इ॒त्था । नृऽभ्यः॑ । श॒श॒मा॒नेभ्यः॑ । ता । यदि॑ । सखा॑या । स॒ख्याय॑ । सोमैः॑ । सु॒तेभिः॑ । सु॒ऽप्र॒यसा॑ । मा॒दयै॑ते॒ इति॑ ॥

The Pada Paath - transliteration

indrā | ha | ratnam | varuṇā | dheṣṭhā | itthā | nṛ-bhyaḥ | śaśamānebhyaḥ | tā | yadi | sakhāyā | sakhyāya | somaiḥ | sutebhiḥ | su-prayasā | mādayaiteiti

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-004

MANTRA NUMBER:

Mantra 4 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 4 of Varga 15 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 73 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रा॑ यु॒वं व॑रुणा दि॒द्युम॑स्मि॒न्नोजि॑ष्ठमु॒ग्रा नि व॑धिष्टं॒ वज्र॑म् । यो नौ॑ दु॒रेवो॑ वृ॒कति॑र्द॒भीति॒स्तस्मि॑न्मिमाथाम॒भिभू॒त्योजः॑ ॥

The Mantra without meters (Sanskrit)

इन्द्रा युवं वरुणा दिद्युमस्मिन्नोजिष्ठमुग्रा नि वधिष्टं वज्रम् । यो नो दुरेवो वृकतिर्दभीतिस्तस्मिन्मिमाथामभिभूत्योजः ॥

The Mantra's transliteration in English

indrā yuvaṁ varuṇā didyum asminn ojiṣṭham ugrā ni vadhiṣṭaṁ vajram | yo no durevo vṛkatir dabhītis tasmin mimāthām abhibhūty ojaḥ ||

The Pada Paath (Sanskrit)

इन्द्रा॑ । यु॒वम् । व॒रु॒णा॒ । दि॒द्युम् । अ॒स्मि॒न् । ओजि॑ष्ठम् । उ॒ग्रा॒ । नि । व॒धि॒ष्ट॒म् । वज्र॑म् । यः । नः॒ । दुः॒ऽएवः॑ । वृ॒कतिः॑ । द॒भीतिः॑ । तस्मि॑न् । मि॒मा॒था॒म् । अ॒भिऽभू॑ति । ओजः॑ ॥

The Pada Paath - transliteration

indrā | yuvam | varuṇā | didyum | asmin | ojiṣṭham | ugrā | ni | vadhiṣṭam | vajram | yaḥ | naḥ | duḥ-evaḥ | vṛkatiḥ | dabhītiḥ | tasmin | mimāthām | abhi-bhūti | ojaḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-005

MANTRA NUMBER:

Mantra 5 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 5 of Varga 15 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 74 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रा॑ यु॒वं व॑रुणा भू॒तम॒स्या धि॒यः प्रे॒तारा॑ वृष॒भेव॑ धे॒नोः । सा नौ॑ दुहीय॒द्यव॑सेव ग॒त्वी स॒हस्र॑धारा॒ पय॑सा म॒ही गौः ॥

The Mantra without meters (Sanskrit)

इन्द्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनोः । सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥

The Mantra's transliteration in English

indrā yuvaṁ varuṇā bhūtam asyā dhiyaḥ pretārā vṛṣabheva dhenoḥ | sā no duhīyad yavaseva gatvī sahasradhārā payasā mahī gauḥ ||

The Pada Paath (Sanskrit)

इन्द्रा॑ । यु॒वम् । व॒रु॒णा॒ । भू॒तम् । अ॒स्याः । धि॒यः । प्रे॒तारा॑ । वृ॒ष॒भाऽइ॑व । धे॒नोः । सा । न॒ः । दु॒ही॒य॒त् । यव॑साऽइव । ग॒त्वी । स॒हस्र॑ऽधारा । पय॑सा । म॒ही । गौः ॥

The Pada Paath - transliteration

indrā | yuvam | varuṇā | bhūtam | asyāḥ | dhiyaḥ | pretārā | vṛṣabhāiva | dhenoḥ | sā | naḥ | duhīyat | yavasāiva | gatvī | sahasra-dhārā | payasā | mahī | gauḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-006

MANTRA NUMBER:

Mantra 6 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 1 of Varga 16 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 75 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तो॒के हि॒ते तन॑य उ॒र्वरा॑सु॒ सूरो॒ दृशी॑के॒ वृष॑णश्च॒ पौंस्ये॑ । इन्द्रा॑ नो॒ अत्र॒ वरु॑णा स्याता॒मवो॑भिर्द॒स्मा परि॑तक्म्यायाम् ॥

The Mantra without meters (Sanskrit)

तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये । इन्द्रा नो अत्र वरुणा स्यातामवोभिर्दस्मा परितक्म्यायाम् ॥

The Mantra's transliteration in English

toke hite tanaya urvarāsu sūro dṛśīke vṛṣaṇaś ca pauṁsye | indrā no atra varuṇā syātām avobhir dasmā paritakmyāyām ||

The Pada Paath (Sanskrit)

तो॒के । हि॒ते । तन॑ये । उ॒र्वरा॑सु । सूरः॑ । दृशी॑के । वृष॑णः । च॒ । पौंस्ये॑ । इन्द्रा॑ । न॒: । अत्र॑ । वरु॑णा । स्या॒ता॒म् । अवः॑ऽभिः । द॒स्मा । परि॑ऽतक्म्यायाम् ॥

The Pada Paath - transliteration

toke | hite | tanaye | urvarāsu | sūraḥ | dṛśīke | vṛṣaṇaḥ | ca | paiṃsye | indrā | naḥ | atra | varuṇā | syātām | avaḥ-bhiḥ | dasmā | pari-takmyāyām

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-007

MANTRA NUMBER:
Mantra 7 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 2 of Varga 16 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 76 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- पङ्क्तिः

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी । वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शम्भू ॥

The Mantra without meters (Sanskrit)

युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी । वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शम्भू ॥

The Mantra's transliteration in English

yuvām id dhy avase pūrvyāya pari prabhūtī gaviṣaḥ svāpī | vṛṇīmahe sakhyāya priyāya śūrā maṁhiṣṭhā pitareva śambhū ||

The Pada Paath (Sanskrit)

युवाम् । इत् । हि । अवसे । पूर्व्याय । परि । प्रभूती इति प्रऽभूती । गोऽइषः । स्वापी इति सुऽआपी । वृणीमहे । सख्याय । प्रियाय । शूरा । मंहिष्ठा । पितराऽइव । शम्भू इति शम्ऽभू ॥

The Pada Paath - transliteration

yuvām | it | hi | avase | pūrvyāya | pari | prabhūtī itipra-bhūtī | go--iṣaḥ | svāpī itisu-āpī | vṛṇīmahe | sakhyāya | priyāya | śūrā | maṃhiṣṭhā | pitarāiva | śambhū itiśam-bhū

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-008

MANTRA NUMBER:

Mantra 8 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 3 of Varga 16 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 77 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

ता वां धियोऽवसे वाजयन्तीराजिं न जग्मुर्युवयूः सुदानू । श्रिये न गाव उप सोममस्थुरिन्द्रं गिरो वरुणं मे मनीषाः ॥

The Mantra without meters (Sanskrit)

ता वां धियोऽवसे वाजयन्तीराजिं न जग्मुर्युवयूः सुदानू । श्रिये न गाव उप सोममस्थुरिन्द्रं गिरो वरुणं मे मनीषाः ॥

The Mantra's transliteration in English

tā vāṁ dhiyo 'vase vājayantīr ājiṁ na jagmur yuvayūḥ sudānū | śriye na gāva upa somam asthur indraṁ giro varuṇam me manīṣāḥ ||

The Pada Paath (Sanskrit)

ताः । वाम् । धियः । अवसे । वाजऽयन्तीः । आजिम् । न । जग्मुः । युवऽयूः । सुदानू इति सुऽदानू । श्रिये । न । गावः । उप । सोमम् । अस्थुः । इन्द्रम् । गिरः । वरुणम् । मे । मनीषाः ॥

The Pada Paath - transliteration

tāḥ | vām | dhiyaḥ | avase | vāja-yantīḥ | ājim | na | jamuḥ | yuva-yūḥ | sudānūitisu-dānū | śriye | na | gāvaḥ | upa | somam | asthuḥ | indram | giraḥ | varuṇam | me | manīṣāḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-009

MANTRA NUMBER:

Mantra 9 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 4 of Varga 16 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 78 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒मा इन्द्रं॒ वरु॑णं मे मनी॒षा अग्म॒न्नुप॒ द्रवि॑णमि॒च्छमा॑नाः । उपे॑मस्थुर्जो॒ष्टार॑ इव॒ वस्वो॑ र॒घ्वीरि॑व॒ श्रव॑सो॒ भिक्ष॑माणाः ॥

The Mantra without meters (Sanskrit)

इमा इन्द्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः । उपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः ॥

The Mantra's transliteration in English

imā indraṁ varuṇam me manīṣā agmann upa draviṇam icchamānāḥ | upem asthur joṣṭāra iva vasvo raghvīr iva śravaso bhikṣamāṇāḥ ||

The Pada Paath (Sanskrit)

इ॒माः । इन्द्र॑म् । वरु॑णम् । मे॒ । म॒नी॒षाः । अग्म॑न् । उप॑ । द्रवि॑णम् । इ॒च्छमा॑नाः । उप॑ । ई॒म् । अ॒स्थुः॒ । जो॒ष्टारः॑ऽइव । वस्वः॑ । र॒घ्वीः॑ऽइ॑व । श्रव॑सः । भिक्ष॑माणाः ॥

The Pada Paath - transliteration

imāḥ | indram | varuṇam | me | manīṣāḥ | agman | upa | draviṇam | icchamānāḥ | upa | īm | asthuḥ | joṣṭāraḥ-iva | vasvaḥ | raghvīḥ-iva | śravasaḥ | bhikṣamāṇāḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-010

MANTRA NUMBER:
Mantra 10 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 5 of Varga 16 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 79 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम । ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचन्ताम् ॥

The Mantra without meters (Sanskrit)

अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम । ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचन्ताम् ॥

The Mantra's transliteration in English

aśvyasya tmanā rathyasya puṣṭer nityasya rāyaḥ patayaḥ syāma | tā cakrāṇā ūtibhir navyasībhir asmatrā rāyo niyutaḥ sacantām ||

The Pada Paath (Sanskrit)

अश्व्यस्य । त्मना । रथ्यस्य । पुष्टेः । नित्यस्य । रायः । पतयः । स्याम । ता । चक्राणौ । ऊतिऽभिः । नव्यसीभिः । अस्मऽत्रा । रायः । निऽयुतः । सचन्ताम् ॥

The Pada Paath - transliteration

aśvyasya | tmanā | rathyasya | puṣṭeḥ | nityasya | rāyaḥ | patayaḥ | syāma | tā | cakrāṇau | ūti-bhiḥ | navyasībhiḥ | asma-trā | rāyaḥ | ni-yutaḥ | sacantām

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-041/mantra-rig-04-041-011

MANTRA NUMBER:

Mantra 11 of Sukta 41 of Mandal 4 of Rig Veda
Mantra 6 of Varga 16 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 80 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वामदेवो गौतमः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ नौ बृहन्ता बृहतीभिरूती इन्द्र यातं वरुण वाजसातौ । यद्दिद्यवः पृतनासु प्रक्रीळान्तस्यं वां स्याम सनितारं आजेः ॥

The Mantra without meters (Sanskrit)

आ नो बृहन्ता बृहतीभिरूती इन्द्र यातं वरुण वाजसातौ । यद्दिद्यवः पृतनासु प्रक्रीळान्तस्य वां स्याम सनितार आजेः ॥

The Mantra's transliteration in English

ā no bṛhantā bṛhatībhir ūtī indra yātaṁ varuṇa vājasātau | yad didyavaḥ pṛtanāsu prakrīḻān tasya vāṁ syāma sanitāra ājeḥ ||

The Pada Paath (Sanskrit)

आ । नः । बृहन्ता । बृहतीभिः । ऊती । इन्द्र । यातम् । वरुण । वाजऽसातौ । यत् । दिद्यवः । पृतनासु । प्रऽक्रीळान् । तस्य । वाम् । स्याम । सनितारः । ओजः ॥

The Pada Paath - transliteration

ā | naḥ | bṛhantā | bṛhatībhiḥ | ūtī | indra | yātam | varuṇa | vāja-sātau | yat | didyavaḥ | pṛtanāsu | pra-krīḻān | tasya | vām | syāma | sanitāraḥ | ojaḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-001

MANTRA NUMBER:

Mantra 1 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 1 of Varga 17 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 81 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- आत्मा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

मम॑ द्वि॒ता रा॒ष्ट्रं क्ष॒त्रिय॑स्य वि॒श्वायो॒र्विश्वे॑ अ॒मृता॒ यथा॑ नः । क्रतुं॑ सचन्ते॒ वरु॑णस्य दे॒वा राजा॑मि कृ॒ष्टेरु॑प॒मस्य॑ व॒व्रेः ॥

The Mantra without meters (Sanskrit)

मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता यथा नः । क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥

The Mantra's transliteration in English

mama dvitā rāṣṭraṁ kṣatriyasya viśvāyor viśve amṛtā yathā naḥ | kratuṁ sacante varuṇasya devā rājāmi kṛṣṭer upamasya vavreḥ ||

The Pada Paath (Sanskrit)

मम॑ । द्वि॒ता । रा॒ष्ट्रम् । क्ष॒त्रिय॑स्य । वि॒श्वऽआ॑योः । विश्वे॑ । अ॒मृताः॑ । यथा॑ । नः॒ । क्रतु॑म् । स॒च॒न्ते॒ । वरु॑णस्य । दे॒वाः । राजा॑मि । कृ॒ष्टेः । उ॒प॒मस्य॑ । व॒व्रेः ॥

The Pada Paath - transliteration

mama | dvitā | rāṣṭram | kṣatriyasya | viśva-āyoḥ | viśve | amṛtāḥ | yathā | naḥ | kratum | sacante | varuṇasya | devāḥ | rājāmi | kṛṣṭeḥ | upamasya | vavreḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-002

MANTRA NUMBER:

Mantra 2 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 2 of Varga 17 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 82 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- आत्मा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒हं राजा॒ वरु॑णो॒ मह्यं॒ तान्य॑सु॒र्या॑णि प्रथ॒मा धा॑रयन्त । क्रतुं॑ सचन्ते॒ वरु॑णस्य दे॒वा राजा॑मि कृ॒ष्टेरु॑प॒मस्य॑ व॒व्रेः ॥

The Mantra without meters (Sanskrit)

अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयन्त । क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥

The Mantra's transliteration in English

ahaṁ rājā varuṇo mahyaṁ tāny asuryāṇi prathamā dhārayanta | kratuṁ sacante varuṇasya devā rājāmi kṛṣṭer upamasya vavreḥ ||

The Pada Paath (Sanskrit)

अ॒हम् । राजा॑ । वरु॑णः । मह्य॑म् । तानि॑ । अ॒सु॒र्या॑णि । प्र॒थ॒मा । धा॒र॒य॒न्त॒ । क्रतु॑म् । स॒च॒न्ते॒ । वरु॑णस्य । दे॒वाः । राजा॑मि । कृ॒ष्टेः । उ॒प॒मस्य॑ । व॒व्रेः ॥

The Pada Paath - transliteration

aham | rājā | varuṇaḥ | mahyam | tāni | asuryāṇi | prathamā | dhārayanta | kratum | sacante | varuṇasya | devāḥ | rājāmi | kṛṣṭeḥ | upamasya | vavreḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-003

MANTRA NUMBER:

Mantra 3 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 3 of Varga 17 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 83 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- आत्मा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒हमिन्द्रो॒ वरु॑ण॒स्ते म॑हि॒त्वोर्वी ग॑भी॒रे रज॑सी सु॒मेके॑ । त्वष्टे॑व॒ विश्वा॒ भुव॑नानि वि॒द्वान्त्समै॑रयं॒ रोद॑सी धा॒रयं॑ च ॥

The Mantra without meters (Sanskrit)

अहमिन्द्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके । त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारयं च ॥

The Mantra's transliteration in English

aham indro varuṇas te mahitvorvī gabhīre rajasī sumeke | tvaṣṭeva viśvā bhuvanāni vidvān sam airayaṁ rodasī dhārayaṁ ca ||

The Pada Paath (Sanskrit)

अहम् । इन्द्रः॑ । वरु॑णः । ते इति॑ । म॒हि॒ऽत्वा । उ॒र्वी इति॑ । ग॒भी॒रे । रज॑सी॒ इति॑ । सु॒मेके॒ इति॑ सु॒ऽमेके॑ । त्वष्टा॑ऽइव । विश्वा॑ । भु॒व॑नानि । वि॒द्वान् । सम् । ऐ॒र॒य॒म् । रोद॑सी॒ इति॑ । धा॒रय॑म् । च॒ ॥

The Pada Paath - transliteration

aham | indraḥ | varuṇaḥ | te iti | mahi-tvā | urvī iti | gabhīre | rajasī | iti | sumeke itisu-meke | tvaṣṭāiva | viśvā | bhuvanāni | vidvān | sam | airayam | rodasī iti | dhārayam | ca

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-004

MANTRA NUMBER:

Mantra 4 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 4 of Varga 17 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 84 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- आत्मा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒हम॒पो अ॑पिन्वमु॒क्षमा॑णा धा॒रयं॒ दिवं॒ सद॑न ऋ॒तस्य॑ । ऋ॒तेन॑ पु॒त्रो अदि॑तेऋ॒तावो॒त त्रि॒धातु॑ प्रथय॒द्वि भूम॑ ॥

The Mantra without meters (Sanskrit)

अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य । ऋतेन पुत्रो अदितेऋतावोत त्रिधातु प्रथयद्वि भूम ॥

The Mantra's transliteration in English

aham apo apinvam ukṣamāṇā dhārayaṁ divaṁ sadana ṛtasya | ṛtena putro aditer ṛtāvota tridhātu prathayad vi bhūma ||

The Pada Paath (Sanskrit)

अ॒हम् । अ॒पः । अ॒पि॒न्व॒म् । उ॒क्षमा॑णाः । धा॒रय॑म् । दिव॑म् । सद॑ने । ऋ॒तस्य॑ । ऋ॒तेन॑ । पु॒त्रः । अदि॑तेः । ऋ॒तऽवा॑ । उ॒त । त्रि॒ऽधातु॑ । प्र॒थ॒य॒त् । वि । भूम॑ ॥

The Pada Paath - transliteration

aham | apaḥ | apinvam | ukṣamāṇāḥ | dharayam | divam | sadane | ṛtasya | ṛtena | putraḥ | aditeḥ | ṛta-vā | uta | tri-dhātu | prathayat | vi | bhūma

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-005

MANTRA NUMBER:

Mantra 5 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 5 of Varga 17 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 85 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- आत्मा

छन्द: (Chhand) :- निचृत्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते । कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमभिभूत्योजाः ॥

The Mantra without meters (Sanskrit)

मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते । कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमभिभूत्योजाः ॥

The Mantra's transliteration in English

māṁ naraḥ svaśvā vājayanto māṁ vṛtāḥ samaraṇe havante | kṛṇomy ājim maghavāham indra iyarmi reṇum abhibhūtyojāḥ ||

The Pada Paath (Sanskrit)

माम् । नरः । सुऽअश्वाः । वाजऽयन्तः । माम् । वृताः । सम्ऽअरणे । हवन्ते । कृणोमि । आजिम् । मघऽवा । अहम् । इन्द्रः । इयर्मि । रेणुम् । अभिभूतिऽओजाः ॥

The Pada Paath - transliteration

mām | naraḥ | su-aśvāḥ | vāja-yantaḥ | mām | vṛtāḥ | sam-araṇe | havante | kṛṇomi | ājim | magha-vā | aham | indraḥ | iyarmi | reṇum | abhibhūti-ojāḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-006

MANTRA NUMBER:

Mantra 6 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 1 of Varga 18 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 86 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- आत्मा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒हं ता विश्वा॑ चक॒रं नकि॑र्मा॒ दैव्यं॒ सहो॑ वरते॒ अप्र॑तीतम् । यन्मा॒ सोमा॑सो म॒मद॒न्यदु॒क्थोभे भ॑येते॒ रज॑सी अपा॒रे ॥

The Mantra without meters (Sanskrit)

अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतम् । यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे ॥

The Mantra's transliteration in English

ahaṁ tā viśvā cakaraṁ nakir mā daivyaṁ saho varate apratītam | yan mā somāso mamadan yad ukthobhe bhayete rajasī apāre ||

The Pada Paath (Sanskrit)

अ॒हम् । ता । विश्वा॑ । च॒क॒र॒म् । नकिः॑ । मा॒ । दैव्य॑म् । सहः॑ । व॒र॒ते॒ । अप्र॑तिऽइतम् । यत् । मा॒ । सोमा॑सः । म॒मद॑न् । यत् । उ॒क्था । उ॒भे इति॑ । भ॒ये॒ते॒ इति॑ । रज॑सी॒ इति॑ । अ॒पा॒रे इति॑ ॥

The Pada Paath - transliteration

aham | tā | viśvā | cakaram | nakiḥ | mā | daivyam | sahaḥ | varate | aprati-itam | yat | mā | somāsaḥ | mamadan | yat | ukthā | ubhe iti | bhayeteiti | rajasī iti | apāre iti

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-007

MANTRA NUMBER:

Mantra 7 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 2 of Varga 18 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 87 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

वि॒दुष्टे॒ विश्वा॒ भुव॑नानि॒ तस्य॒ ता प्र ब्र॑वीषि॒ वरु॑णाय वेधः । त्वं वृ॒त्राणि॑ शृण्विषे जघ॒न्वान्त्वं वृ॒ताँ अ॑रिणा इन्द्र॒ सिन्धू॑न् ॥

The Mantra without meters (Sanskrit)

विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः । त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥

The Mantra's transliteration in English

viduṣ ṭe viśvā bhuvanāni tasya tā pra bravīṣi varuṇāya vedhaḥ | tvaṁ vṛtrāṇi śṛṇviṣe jaghanvān tvaṁ vṛtām̐ ariṇā indra sindhūn ||

The Pada Paath (Sanskrit)

वि॒दुः । ते॒ । विश्वा॑ । भुव॑नानि । तस्य॑ । ता । प्र । ब्र॒वी॒षि॒ । वरु॑णाय । वे॒धः॒ । त्वम् । वृ॒त्राणि॑ । शृ॒ण्वि॒षे॒ । ज॒घ॒न्वान् । त्वम् । वृ॒ताम् । अ॒रि॒णाः॒ । इ॒न्द्र॒ । सिन्धू॑न् ॥

The Pada Paath - transliteration

viduḥ | te | viśvā | bhuvanāni | tasya | tā | pra | bravīṣi | varuṇāya | vedhaḥ | tvam | vṛtrāṇi | śṛṇviṣe | jaghanvān | tvam | vṛtām | ariṇāḥ | indra | sindhūn

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-008

MANTRA NUMBER:

Mantra 8 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 3 of Varga 18 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 88 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒स्माक॑मत्र॑ पि॒तर॒स्त आ॑सन्त्स॒प्त ऋष॑यो दौर्ग॒हे ब॒ध्यमा॑ने । त आय॑जन्त त्र॒सद॑स्युमस्या॒ इन्द्रं॒ न वृ॑त्र॒तुर॑मर्धदे॒वम् ॥

The Mantra without meters (Sanskrit)

अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे बध्यमाने । त आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम् ॥

The Mantra's transliteration in English

asmākam atra pitaras ta āsan sapta ṛṣayo daurgahe badhyamāne | ta āyajanta trasadasyum asyā indraṁ na vṛtraturam ardhadevam ||

The Pada Paath (Sanskrit)

अ॒स्माक॑म् । अत्र॑ । पि॒तर॑ः । ते । आ॒स॒न् । स॒प्त । ऋष॑यः । दौः॒ऽग॒हे । ब॒ध्यमा॑ने । ते । आ । अ॒य॒ज॒न्त॒ । त्र॒सद॑स्युम् । अ॒स्याः॒ । इन्द्र॑म् । न । वृ॒त्र॒ऽतुर॑म् । अ॒र्ध॒ऽदे॒वम् ॥

The Pada Paath - transliteration

asmākam | atra | pitaraḥ | te | āsan | sapta | ṛṣayaḥ | dauḥ-gahe | badhyamāne | te | ā | ayajanta | trasadasyum | asyāḥ | indram | na | vṛtra-turam | ardha-devam

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-009

MANTRA NUMBER:

Mantra 9 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 4 of Varga 18 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 89 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- इन्द्रावरुणौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

पुरुकुत्सानी हि वामदाशद्धव्येभिरिन्द्रावरुणा नमोभिः । अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवम् ॥

The Mantra without meters (Sanskrit)

पुरुकुत्सानी हि वामदाशद्धव्येभिरिन्द्रावरुणा नमोभिः । अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवम् ॥

The Mantra's transliteration in English

purukutsānī hi vām adāśad dhavyebhir indrāvaruṇā namobhiḥ | athā rājānaṁ trasadasyum asyā vṛtrahaṇaṁ dadathur ardhadevam ||

The Pada Paath (Sanskrit)

पुरुऽकुत्सानी । हि । वाम् । अदाशत् । हव्येभिः । इन्द्रावरुणा । नमःऽभिः । अथ । राजानम् । त्रसदस्युम् । अस्याः । वृत्रऽहनम् । ददथुः । अर्धऽदेवम् ॥

The Pada Paath - transliteration

puru-kutsānī | hi | vām | adāśat | havyebhiḥ | indrāvaruṇā | namaḥ-bhiḥ | atha | rājānam | trasadasyum | asyāḥ | vṛtra-hanam | dadathuḥ | ardha-devam

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-042/mantra-rig-04-042-010

MANTRA NUMBER:

Mantra 10 of Sukta 42 of Mandal 4 of Rig Veda
Mantra 5 of Varga 18 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 90 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- त्रसदस्युः पौरुकुत्स्यः

देवता (Devataa) :- इन्द्रावरुणौ

छन्दः (Chhand) :- त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

रा॒या व॒यं स॑स॒वांसो॑ मदेम ह॒व्येन॑ दे॒वा यव॑सेन॒ गाव॑: । तां धे॒नुमि॑न्द्रावरुणा यु॒वं नो॑ वि॒श्वाहा॑ धत्त॒मन॑पस्फुरन्तीम् ॥

The Mantra without meters (Sanskrit)

राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः । तां धेनुमिन्द्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् ॥

The Mantra's transliteration in English

rāyā vayaṁ sasavāṁso madema havyena devā yavasena gāvaḥ | tāṁ dhenum indrāvaruṇā yuvaṁ no viśvāhā dhattam anapasphurantīm ||

The Pada Paath (Sanskrit)

रा॒याः । व॒यम् । स॒स॒ऽवांसः॑ । म॒दे॒म॒ । ह॒व्येन॑ । दे॒वाः । यव॑सेन । गाव॑ः । ताम् । धे॒नुम् । इ॒न्द्रा॒व॒रु॒णा॒ । यु॒वम् । नः॒ । वि॒श्वाहा॑ । ध॒त्त॒म् । अन॑पऽस्फुरन्तीम् ॥

The Pada Paath - transliteration

rāyāḥ | vayam | sasa-vāṃsaḥ | madema | havyena | devāḥ | yavasena | gāvaḥ | tām | dhenum | indrāvaruṇā | yuvam | naḥ | viśvāhā | dhattam | anapa-sphurantīm

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-043/mantra-rig-04-043-001

MANTRA NUMBER:

Mantra 1 of Sukta 43 of Mandal 4 of Rig Veda
Mantra 1 of Varga 19 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 91 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

क उ॒ श्र॑वत्क॒त॒मो य॒ज्ञिया॑नां व॒न्दारु॑ दे॒वः क॑त॒मो जु॑षाते । कस्ये॒मां दे॒वीम॒मृते॑षु॒ प्रेष्ठां॑ हृ॒दि श्रे॑षाम सुष्टु॒तिं सु॑ह॒व्याम् ॥

The Mantra without meters (Sanskrit)

क उ श्रवत्कतमो यज्ञियानां वन्दारु देवः कतमो जुषाते । कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्याम् ॥

The Mantra's transliteration in English

ka u śravat katamo yajñiyānāṁ vandāru devaḥ katamo juṣāte | kasyemāṁ devīm amṛteṣu preṣṭhāṁ hṛdi śreṣāma suṣṭutiṁ suhavyām ||

The Pada Paath (Sanskrit)

कः । ऊँ इति॑ । श्र॒व॒त् । क॒त॒मः । य॒ज्ञिया॑नाम् । व॒न्दारु॑ । दे॒वः । क॒त॒मः । जु॒षा॒ते॒ । कस्य॑ । इ॒माम् । दे॒वीम् । अ॒मृते॑षु । प्रेष्ठा॑म् । हृ॒दि । श्रे॒षा॒म॒ । सु॒ऽस्तु॒तिम् । सु॒ऽह॒व्याम् ॥

The Pada Paath - transliteration

kaḥ | oṃ iti | śravat | katamaḥ | yajñiyānām | vandāru | devaḥ | katamaḥ | juṣāte | kasya | imām | devīm | amṛteṣu | preṣṭhām | hṛdi | śreṣāma | su-stutim | su-havyām

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-043/mantra-rig-04-043-002

MANTRA NUMBER:

Mantra 2 of Sukta 43 of Mandal 4 of Rig Veda
Mantra 2 of Varga 19 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 92 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्दः (Chhand) :- निचृत्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

को मृ॑ळाति कत॒म आग॑मिष्ठो दे॒वाना॑मु कत॒मः शम्भ॑विष्ठः । रथं॒ कमा॑हुर्द्र॒वद॑श्वमा॒शुं यं सू॒र्य॑स्य दुहि॒तावृ॑णीत ॥

The Mantra without meters (Sanskrit)

को मृळाति कतम आगमिष्ठो देवानामु कतमः शम्भविष्ठः । रथं कमाहुर्द्रवदश्वमाशुं यं सूर्यस्य दुहितावृणीत ॥

The Mantra's transliteration in English

ko mṛḻāti katama āgamiṣṭho devānām u katamaḥ śambhaviṣṭhaḥ | rathaṁ kam āhur dravadaśvam āśuṁ yaṁ sūryasya duhitāvṛṇīta ||

The Pada Paath (Sanskrit)

कः । मृ॒ळा॒ति॒ । क॒त॒मः । आऽग॑मिष्ठः । दे॒वाना॑म् । ॐ इति॑ क॒त॒मः । शम्ऽभ॑विष्ठः । रथ॑म् । कम् । आ॒हुः॒ । द्र॒वत्ऽअ॑श्वम् । आ॒शुम् । यम् । सू॒र्य॑स्य । दु॒हि॒ता । अवृ॑णीत ॥

The Pada Paath - transliteration

kaḥ | mṛḷāti | katamaḥ | āgamiṣṭhaḥ | devānām | oṃ itikatamaḥ | śam-bhaviṣṭhaḥ | ratham | kam | āhuḥ | dravat-aśvam | āśum | yam | sūryasya | duhitā | avṛṇīta

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-043/mantra-rig-04-043-003

MANTRA NUMBER:

Mantra 3 of Sukta 43 of Mandal 4 of Rig Veda
Mantra 3 of Varga 19 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 93 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

मक्षू हि ष्मा गच्छथ ईवतो द्यूनिन्द्रो न शक्तिं परितक्म्यायाम् । दिव आजाता दिव्या सुपर्णा कया शचीनां भवथ: शचिष्ठा ॥

The Mantra without meters (Sanskrit)

मक्षू हि ष्मा गच्छथ ईवतो द्यूनिन्द्रो न शक्तिं परितक्म्यायाम् । दिव आजाता दिव्या सुपर्णा कया शचीनां भवथः शचिष्ठा ॥

The Mantra's transliteration in English

makṣū hi ṣmā gacchatha īvato dyūn indro na śaktim paritakmyāyām | diva ājātā divyā suparṇā kayā śacīnām bhavathaḥ śaciṣṭhā ||

The Pada Paath (Sanskrit)

मक्षु । हि । स्म । गच्छथः । ईवतः । द्यून् । इन्द्रः । न । शक्तिम् । परिऽतक्म्यायाम् । दिवः । आऽजाता । दिव्या । सुऽपर्णा । कया । शचीनाम् । भवथः । शचिष्ठा ॥

The Pada Paath - transliteration

makṣu | hi | sma | gacchathaḥ | īvataḥ | dyūn | indraḥ | na | śaktim | pari-takmyāyām | divaḥ | ājātā | divyā | su-parṇā | kayā | śacīnām | bhavathaḥ | śaciṣṭhā

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-043/mantra-rig-04-043-004

MANTRA NUMBER:

Mantra 4 of Sukta 43 of Mandal 4 of Rig Veda
Mantra 4 of Varga 19 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 94 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्दः (Chhand) :- स्वराट्पङ्क्तिः

स्वरः (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

का वां॑ भूदुप॑मातिः कया॑ न आश्वि॑ना गमथो हूयमा॑ना । को वां॑ महश्चित्त्यज॑सो अभीक॑ उरुष्यतं माध्वी दस्रा न ऊती ॥

The Mantra without meters (Sanskrit)

का वां भूदुपमातिः कया न आश्विना गमथो हूयमाना । को वां महश्चित्त्यजसो अभीक उरुष्यतं माध्वी दस्रा न ऊती ॥

The Mantra's transliteration in English

kā vām bhūd upamātiḥ kayā na āśvinā gamatho hūyamānā | ko vām mahaś cit tyajaso abhīka uruṣyatam mādhvī dasrā na ūtī ||

The Pada Paath (Sanskrit)

का । वाम् । भूत् । उप॑ऽमातिः । कया॑ । नः । आ । अश्विना । गमथः । हूयमा॑ना । कः । वाम् । महः । चित् । त्यज॑सः । अभीके॑ । उरुष्यत॑म् । माध्वी इति॑ । दस्रा । नः । ऊती ॥

The Pada Paath - transliteration

kā | vām | bhūt | upa-mātiḥ | kayā | naḥ | ā | aśvinā | gamathaḥ | hūyamānā | kaḥ | vām | mahaḥ | cit | tyajasaḥ | abhīke | uruṣyatam | mādhvī iti | dasrā | naḥ | ūtī

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-043/mantra-rig-04-043-005

MANTRA NUMBER:

Mantra 5 of Sukta 43 of Mandal 4 of Rig Veda
Mantra 5 of Varga 19 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 95 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उ॒रु वां॒ रथ॒: परि॑ नक्षति॒ द्यामा यत्स॑मु॒द्राद॒भि वर्त॑ते वाम् । मध्वा॑ माध्वी॒ मधु॑ वां प्रुषाय॒न्यत्सीं॑ वां॒ पृक्षो॑ भु॒रज॑न्त प॒क्वाः ॥

The Mantra without meters (Sanskrit)

उरु वां रथः परि नक्षति द्यामा यत्समुद्रादभि वर्तते वाम् । मध्वा माध्वी मधु वां प्रुषायन्यत्सीं वां पृक्षो भुरजन्त पक्वाः ॥

The Mantra's transliteration in English

uru vāṁ rathaḥ pari nakṣati dyām ā yat samudrād abhi vartate vām | madhvā mādhvī madhu vām pruṣāyan yat sīṁ vām pṛkṣo bhurajanta pakvāḥ ||

The Pada Paath (Sanskrit)

उ॒रु । वा॒म् । रथः॑ । परि॑ । न॒क्ष॒ति॒ । द्याम् । आ । यत् । स॒मु॒द्रात् । अ॒भि । वर॑ते । वा॒म् । मध्वा॑ । मा॒ध्वी॒ इति॑ । मधु॑ । वा॒म् । प्र॒ु॒षा॒य॒न् । यत् । सी॒म् । वा॒म् । पृक्षः॑ । भु॒रज॑न्त । प॒क्वाः ॥

The Pada Paath - transliteration

uru | vām | rathaḥ | pari | nakṣati | dyām | ā | yat | samudrāt | abhi | varate | vām | madhvā | mādhvī iti | madhu | vām | pruṣāyan | yat | sīm | vām | pṛkṣaḥ | bhurajanta | pakvaaḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-043/mantra-rig-04-043-006

MANTRA NUMBER:

Mantra 6 of Sukta 43 of Mandal 4 of Rig Veda
Mantra 6 of Varga 19 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 96 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

सिन्धु॑र्ह वां र॒सया॑ सिञ्च॒दश्वा॒न्घृ॒णा वयो॑ऽरु॒षास॒: परि॑ ग्मन् । तदू॒ षु वा॑मजि॒रं चे॑ति॒ यानं॒ येन॒ पती॒ भव॑थः सू॒र्याया॑: ॥

The Mantra without meters (Sanskrit)

सिन्धुर्ह वां रसया सिञ्चदश्वान्घृणा वयोऽरुषासः परि ग्मन् । तदू षु वामजिरं चेति यानं येन पती भवथः सूर्यायाः ॥

The Mantra's transliteration in English

sindhur ha vāṁ rasayā siñcad aśvān ghṛṇā vayo 'ruṣāsaḥ pari gman | tad ū ṣu vām ajiraṁ ceti yānaṁ yena patī bhavathaḥ sūryāyāḥ ||

The Pada Paath (Sanskrit)

सिन्धु॑ः । ह॒ । वा॒म् । र॒सया॑ । सि॒ञ्च॒त् । अश्वा॑न् । घृ॒णा । वय॑ः । अ॒रु॒षास॑ः । परि॑ । ग्म॒न् । तत् । ऊँ इति॑ । सु॒ । वा॒म् । अ॒जि॒रम् । चे॒ति॒ । यान॑म् । येन॑ । पती॒ इति॑ । भव॑थः । सू॒र्याया॑ः ॥

The Pada Paath - transliteration

sindhuḥ | ha | vām | rasayā | siñcat | aśvān | ghṛṇā | vayaḥ | aruṣāsaḥ | pari | gman | tat | oṃ iti | su | vām | ajiram | ceti | yānam | yena | patī iti | bhavathaḥ | sūryāyāḥ

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-043/mantra-rig-04-043-007

MANTRA NUMBER:

Mantra 7 of Sukta 43 of Mandal 4 of Rig Veda
Mantra 7 of Varga 19 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 97 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒हेह॒ यद्वां॑ सम॒ना प॑पृ॒क्षे सेयम॒स्मे सु॑म॒तिर्वा॑जरत्ना। उ॒रु॒ष्यतं॑ जरि॒तारं॑ यु॒वं ह॑ श्रि॒तः कामो॑ नासत्या यु॒व॒द्रिक् ॥

The Mantra without meters (Sanskrit)

इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना। उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥

The Mantra's transliteration in English

iheha yad vāṁ samanā papṛkṣe seyam asme sumatir vājaratnā | uruṣyataṁ jaritāraṁ yuvaṁ ha śritaḥ kāmo nāsatyā yuvadrik ||

The Pada Paath (Sanskrit)

इ॒हऽइ॑ह। यत्। वा॒म्। स॒म॒ना। प॒पृ॒क्षे। सा। इ॒यम्। अ॒स्मे इति॑। सु॒ऽम॒तिः। वा॒ज॒ऽर॒त्ना॒। उ॒रु॒ष्यत॑म्। ज॒रि॒तार॑म्। यु॒वम्। ह॒। श्रि॒तः। काम॑ः। ना॒स॒त्या॒। यु॒व॒द्रिक् ॥

The Pada Paath - transliteration

iha-iha | yat | vām | samanā | papṛkṣe | sā | iyam | asme iti | su-matiḥ | vāja-ratnā | uruṣyatam | jaritāram | yuvam | ha | śritaḥ | kāmaḥ | nāsatyā | yuvadrik

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-044/mantra-rig-04-044-001

MANTRA NUMBER:

Mantra 1 of Sukta 44 of Mandal 4 of Rig Veda
Mantra 1 of Varga 20 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 98 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः । यः सूर्यां वहति वन्धुरायुर्गिर्वाहसं पुरुतमं वसूयुम् ॥

The Mantra without meters (Sanskrit)

तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः । यः सूर्यां वहति वन्धुरायुर्गिर्वाहसं पुरुतमं वसूयुम् ॥

The Mantra's transliteration in English

taṁ vāṁ rathaṁ vayam adyā huvema pṛthujrayam aśvinā saṁgatiṁ goḥ | yaḥ sūryāṁ vahati vandhurāyur girvāhasam purutamaṁ vasūyum ||

The Pada Paath (Sanskrit)

तम् । वाम् । रथम् । वयम् । अद्य । हुवेम । पृथुऽज्रयम् । अश्विना । सम्ऽगतिम् । गोः । यः । सूर्याम् । वहति । वन्धुरऽयुः । गिर्वाहसम् । पुरुऽतमम् । वसुऽयुम् ॥

The Pada Paath - transliteration

tam | vām | ratham | vayam | adya | huvema | pṛthu-jrayam | aśvinā | sam-gatim | goḥ | yaḥ | sūryām | vahati | vandhura-yuḥ | girvāhasam | puru-tamam | vasu-yum

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-044/mantra-rig-04-044-002

MANTRA NUMBER:

Mantra 2 of Sukta 44 of Mandal 4 of Rig Veda
Mantra 2 of Varga 20 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 99 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पुरुमीळ्हाजमीळ्हौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः । युवोर्वपुरभि पृक्षः सचन्ते वहन्ति यत्ककुहासो रथे वाम् ॥

The Mantra without meters (Sanskrit)

युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः । युवोर्वपुरभि पृक्षः सचन्ते वहन्ति यत्ककुहासो रथे वाम् ॥

The Mantra's transliteration in English

yuvaṁ śriyam aśvinā devatā tāṁ divo napātā vanathaḥ śacībhiḥ | yuvor vapur abhi pṛkṣaḥ sacante vahanti yat kakuhāso rathe vām ||

The Pada Paath (Sanskrit)

युवम् । श्रियम् । अश्विना । देवता । तान् । दिवः । नपाता । वनथः । शचीभिः । युवोः । वपुः । अभि । पृक्षः । सचन्ते । वहन्ति । यत् । ककुहासः । रथे । वाम् ॥

The Pada Paath - transliteration

yuvam | śriyam | aśvinā | devatā | tān | divaḥ | napātā | vanathaḥ | śacībhiḥ | yuvoḥ | vapuḥ | abhi | pṛkṣaḥ | sacante | vahanti | yat | kakuhāsaḥ | rathe | vām

Link: www.vedakosh.com/rig-veda/mandal-4/sukta-044/mantra-rig-04-044-003

MANTRA NUMBER:

Mantra 3 of Sukta 44 of Mandal 4 of Rig Veda
Mantra 3 of Varga 20 of Adhyaya 7 of Ashtak 3 of Rig Veda
Mantra 100 of Anuvaak 4 of Mandal 4 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पुरुमीळहाजमीळहौ सौहोत्रौ

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

को वा॑मद्या क॑रते रा॒तह॑व्य ऊ॒तये॑ वा सुत॒पेया॑य वा॒र्कैः । ऋ॒तस्य॑ वा व॒नुषे॑ पू॒र्व्याय॒ नमो॑ येमा॒नो अ॑श्वि॒ना व॑वर्तत् ॥

The Mantra without meters (Sanskrit)

को वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः । ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥

The Mantra's transliteration in English

ko vām adyā karate rātahavya ūtaye vā sutapeyāya vārkaiḥ | ṛtasya vā vanuṣe pūrvyāya namo yemāno aśvinā vavartat ||

The Pada Paath (Sanskrit)

कः । वा॒म् । अ॒द्य । क॒र॒ते॒ । रा॒तऽह॑व्यः । ऊ॒तये॑ । वा॒ । सु॒त॒ऽपेया॑य । वा॒ । अ॒र्कैः । ऋ॒तस्य॑ । वा॒ । व॒नुषे॑ । पू॒र्व्याय॑ । नमः॑ । ये॒मा॒नः । अ॒श्वि॒ना॒ । आ । व॒व॒र्त॒त् ॥

The Pada Paath - transliteration

